# Vashya Varahi Stotram

# વશ્યવારાહી સ્તોત્રમ્

## Document Information

Text title : vashyavArAhIstotram

File name : vashyavArAhIstotram.itx

Category : devii, kavacha, devI

Location : doc_devii

Proofread by : Aruna Narayanan narayanan.aruna at gmail.com

Description/comments : From Durlabh Stotrani.

Latest update : June 17, 2019

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# Vashya Varahi Stotram

# વશ્યવારાહી સ્તોત્રમ્

અસ્ય શ્રી સર્વ વશીકરણ સ્તોત્ર મન્ત્રસ્ય નારદ ઋષિઃ અનુષ્ટુપ્
છન્દઃ શ્રી વશ્યવારાહી દેવતા ઐં બીજં ક્લીં શક્તિઃ ગ્લૌં કીલકં મમ
સર્વવશ્યાર્થે જપે વિનિયોગઃ ।

નારદ ઋષયે નમઃ શિરસિ ।
અનુષ્ટપ્ છન્દસે નમઃ મુખે ।
વશ્યવારાહી દેવતાયૈ નમઃ હ્રૃદિ ।
ઐં બીજાય નમઃ ગુહ્યે ।
ક્લીં શક્તયે નમઃ પાદયોઃ ।
ગ્લૌં કીલકાય નમઃ સર્વાઙ્ગે ।
હૃદયાદિન્યાસઃ ।   કરન્યાસઃ
ૐ ઐં સર્વવશ્ય વારાહ્યૈ નમઃ । અઙ્ગુષ્ઠાભ્યાં નમ્ઃ । હૃદયે નમઃ ।
ૐ ક્લીં સર્વવશ્ય વારાહ્યૈ નમઃ । તર્જનીભ્યાં નમ્ઃ । શિરસે સ્વાહા ।
ૐ ગ્લૌં સર્વવશ્ય વારાહ્યૈ નમઃ । મધ્યમાભ્યાં નમ્ઃ । શિખાયૈ વષટ્ ।
ૐ સર્વવશ્ય અશ્વારૂઢે નમઃ । અનામિકાભ્યાં નમ્ઃ । કવચાય હું ।
ૐ ક્લીં સર્વવશ્યવારાહ્યૈ નમઃ ।
કનિષ્ઠિકાભ્યાં નમઃ । નેત્રત્રયાય વૌષટ્ ।
ૐ ગ્લૌં મમસર્વવશઙ્કુરિ કુરુ કુરુ ઠઃ ઠઃ  નમઃ ।
કરતલકરપૃષ્ઠાભ્યાં । અસ્ત્રાય ફટ્ ।

ધ્યાનમ્ -
તારે તારિણિ દેવિ વિશ્વજનનિ પ્રૌઢપ્રતાપાન્વિતે ।
તારે દિક્ષુ વિપક્ષ યક્ષ દલિનિ વાચા ચલા વારૂણી ॥

લક્ષ્મીકારિણિ કીર્તિધારિણિ મહા સૌભાગ્ય સન્દાયિનિ ।
રૂપં દેહિ યશશ્ચ સતતં વશ્યં જગત્યાવૃતમ્ ॥

મન્ત્રઃ – ૐ ઐં ક્લીં ગ્લૌં અશ્વારૂઢે સર્વવશ્ય વારાહ્યૈ

મમ સર્વવશઙ્કરિ કુરુ કુરુ ઠઃ ઠઃ ॥

માનસોપચારૈઃ સમ્પૂજ્ય

અથ સ્તોત્રમ્ -
અશ્વારૂઢે રક્તવર્ણે સ્મિતસૌમ્યમુખામ્બુજે ।
રાજ્યસ્ત્રી સર્વજન્તૂનાં વશીકરણનાયિકે ॥ ૧॥

વશીકરણ કાર્યાર્થ પુરા દેવેન નિર્મિતમ્ ।
તસ્માદ્ વશ્યવારાહી સર્વાન્મે વશમાનય ॥ ૨॥

યથા રાજા મહાજ્ઞાનં વસ્ત્રં ધાન્યં મહાવસુ ।
મહ્યં દદાતિ વારાહિ યથાત્વં વશમાનય ॥ ૩॥

અન્તર્બહિશ્ચ મનસિ વ્યાપારેષુ સભાષુ ચ ।
યથા મામેવં સ્મરતિ તથા વશ્યં વશં કુરુ ॥ ૪॥

ચામરં દોલિકાં છત્રં રાજ ચિહ્નાનિ યચ્છતિ ।
અભીષ્ઠં સંપ્રદોરાજ્યં યથા દેવિ વશં કુરુ ॥ ૫॥

મન્મથસ્મરણાદ્રામા રતિર્યાતુ મયાસહ ।
સ્ત્રી રત્નેષુ મહત્પ્રેમ તથા જનયકામદે ॥ ૬॥

મૃગ પક્ષ્યાદયાઃ સર્વે માં દૃષ્ટ્વા પ્રેમમોહિતાઃ ।
અનુગચ્છતિ મામેવ ત્વત્પસાદાદ્યાં કુરુ ॥ ૭॥

વશીકરણ કાર્યાર્થ યત્ર યત્ર પ્રયુઞ્જતિ ।
સમ્મોહનાર્થ વર્દ્ધિત્વાત્તત્કાર્ય તત્ર કર્ષય ॥ ૮॥

વશમસ્તીતિ ચૈવાત્ર વશ્ય કાર્યેષુ દૃશ્યતે ।
તથા માં કુરુ વારાહી વશ્ય કાર્યપ્રદર્શય ॥ ૯॥

વશીકરણ બાણાસ્ત્રં ભક્ત્યાપદ્ધિનિવારણમ્ ।
તસ્માત્ વશ્યવારાહી જગત્સર્વ વશં કુરુ ॥ ૧૦॥

વશ્યસ્તોત્રમિદં દેવ્યા ત્રિસન્ધ્યં યઃ પઠેન્નર ।
અભીષ્ટં પ્રાપ્નુયાદ્ ભક્તો રમાં રાજ્યં યથાપિવઃ ॥ ૧૧॥

ઇતિ અથર્વશિખાયાં વશ્યવારાહી સ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by Aruna Narayanan narayanan.aruna at gmail.com

*Vashya Varahi Stotram*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*